(ख) यत्र सौराज्यरञ्जितमनसः सकलसमृद्धिवर्धितमहोत्सव-प्ररम्परारम्भनिर्भराः, सततमकुलीनं कुलीनाः, प्राप्तविभानम-प्राप्तविमानभङ्गाः कतिपयवसुविराजितमनेकवसवः, समुपहसन्ति स्वर्गवासिनं जनं जनाः ।

(ग) ……प्राणसमः, हृदयसमः, शरीरमात्रभिन्नो द्वितीय इवात्मा, कुलक्रमागत, संक्रान्तिदर्पणः सुखदुःखयोः, स्वभावानुरक्तः शुचिः सत्यपूतवाक्, कृतज्ञः ब्राह्मणः, सालङ्कायनस्य सूनुः श्रुतशीलो नाम महामन्त्री ।

4. त्रिविक्रमभट्टस्य काव्यशैलीं विवेचयत । **16**

**अथवा**

संस्कृतसाहित्ये चम्पूकाव्यानां क्रमिकविकासं वर्णयत ।

5. संस्कृतमाध्यमेन कारिका**द्वयं** सप्रसङ्गं व्याख्येयम्– **2×8=16**

(क) इह शिष्टानुशिष्टानां शिष्टानामपि सर्वथा ।
वाचामेव प्रसादेन लोकयात्रा प्रवर्तते ।।

(ख) तैःशरीरं च काव्यानमलङ्काराश्च दर्शिताः ।
शरीरं तावदिष्टार्थव्यवच्छिन्ना पदावली ।।

(ग) मिश्राणि नाटकादीनि तेषामन्यत्र विस्तरः ।
गद्यपद्यमयी काचिच्चम्पूरित्यभिधीयतै ।।



**Roll No. ..........................** **Total Pages : 02**

# MDQ/M-24 7598

# CHAMPUKAVYAM KAVYADARSHASHCHA

## SKT-SC-404-D

Time : Three Hours] [Maximum Marks : 80

**नोट** : सर्वे प्रश्नाः समाधेयाः ।

1. संक्षेपेण उत्तराणि लिखत– **4×4=16**

(क) नलचम्पूकाव्यस्य प्रथमोच्छ्वासस्य कथासारं लिखत ।

(ख) नलचम्पूकाव्यमाधृत्य निषधायाः वैशिष्ट्यं वर्णयत ।

(ग) त्रिविक्रमभट्टस्य व्यक्तिं कृतित्वं च लिखत ।

(घ) काव्यदर्शानुसारं गद्यस्वरूपं तद्भेदान् च वर्णयत ।

2. काव्यसौष्ठवनिर्देशपूर्वकं श्लोक**द्वयं** व्याख्येयम्– **2×8=16**

(क) प्रसन्नाः कान्तिहारिण्योनानाश्लेषविचक्षणाः ।
भवन्ति कस्यचित्पुण्यैः मुखे वाचो गृहे स्त्रियः ।।

(ख) सदूषणापि निर्दोषा सखरापि सुकोमला ।
नमस्तस्मै कृता येन रम्या रामायणी कथा ।।

(ग) चार्वी सदा सदाचारसज्जसज्जनसेविता ।
नगरी न गरीयस्या सम्पदा सा विवर्जिता ।।

3. काव्यसौष्ठवनिर्देशपूर्वकं गद्यांश**द्वयं** व्याख्येयम्– **2×8=16**

(क) यत्र च मनोहारिसारसद्वन्द्वास्तत्पुरुषेण द्विगुना चाधिष्ठिताः कादम्बरी-गद्यबन्धा इव दृश्यमानबहुव्रीहयः केदाराः ।